शान्ति मन्त्रम्

आपो॒ हिष्ठा म॑यो॒भुवः॒ । ता न॑ ऊ॒र्जे द॑धातन । म॒हेरणा॑य॒ चक्ष॑से । यो वः॑ शि॒वत॑मो॒ रस॒स्तस्य॑ भाजयते॒ ह नः॒ । उ॒ष॒तीरि॑व मा॒तरः॑ । तस्मा॒ अर॑ंगमामवो॒ यस्य॒ क्षया॑य॒ जि॑न्वथ । आपो॑ ज॒नय॑था च नः ।

पृ॒थि॒वी शा॒न्ता साग्निना॑ शा॒न्ता सामे॑ शा॒न्ता शुचगं॑ शमयतु ।
अ॒न्तरि॑क्षगं॒ शा॒न्तं तद्वा॒युना॑ शा॒न्तं तन्मे॑ शा॒न्तगं॑ शुचगं॑ शमयतु ।
द्यौश्शा॒न्ता॒ सादि॒त्येन॑ शा॒न्ता सा मे॑ शा॒न्ता शुचगं॑ शमयतु ।

पृ॒थि॒वी शान्ति॑र॒न्तरि॑क्ष॒गं॒ शान्ति॒र्-द्यौ-श्शान्ति॒र्-दिश॒-श्शान्ति॑-रवान्तरदि॒शा-श्शान्ति॑ र॒ग्नि-श्शान्ति॑र्-वा॒यु-श्शान्ति॑-रादि॒त्य-श्शान्ति॑-श्चन्द्रमा॒-श्शान्ति॒र्-नक्ष॑त्राणि॒-श्शान्ति रापश्शान्ति॒-रोष॑धय॒-श्शान्ति॒र्-वन॒स्पत॑य॒-श्शान्ति॒र्-गौ-श्शान्ति॑-र॒जा-शान्ति-रश्व॒-श्शान्तिः॒ पुरु॑ष॒-श्शान्ति॒-ब्रह्म॒-शान्ति॑र्-ब्राह्मण-श्शान्ति-शान्ति॑-रेव शान्ति-शान्ति॑-र्मे अस्तु॒ शान्तिः॑ ।

तया॒हगं॒ शा॒न्त्या॒ स॑र्वशा॒न्त्या॒ महयं॑ द्वि॒पदे॒ चतु॑ष्पदे॒ च॒ शान्ति॑ं करोमि शान्ति॑र्मे अस्तु॒ शान्तिः॑ ॥

ऐह॒ श्रीश्च॒ ह्रीश्च॒ धृति॑श्च॒ तपो॑ मे॒धा प्र॑ति॒ष्ठा श्र॒द्धा स॒त्यं धर्म॑श्चै॒तानि॒ मोत्ति॑ष्ठन्त॒-मनूत्ति॑ष्ठन्तु॒ मा मा॒ग॒ श्रीश्च॒ ह्रीश्च॒ धृति॑श्च॒ तपो॑ मे॒धा प्र॑ति॒ष्ठा श्र॒द्धा स॒त्यं धर्म॑श्चै॒तानि॑ मा॒ मा हा॑सिषुः ।

उदायुषा स्वायुषोदोषदीनाग्ं रसेनोत्पर्जन्यस्य शुष्मेणोदस्थाममृताग्ं अनु । तच्चक्षुर्-देवहितं पुरस्तोच्चुक्रमुच्चरत् ।

पश्येम शरदश्शतं जीवेम शरदश्शतं नन्दाम शरदश्शतं मोदाम शरदश्शतं भवाम शरदश्शतग्ं शृणवाम शरदश्शतं पब्रवाम शरदश्शतमजीतास्याम शरदश्शतं जोक्च सूर्यं दृषे ।

य उदगान्महतोऽर्णवाद्-विभ्राजमानस्सरिरस्य मध्यात्समा वृषभो लोहिताक्षसूर्यो विपश्चिन्मनसा पुनातु ॥

ब्रह्मणश्चोतन्यसि ब्रह्मण आणीस्थो ब्राह्मण आवपनमसि धारितेयं पृथिवी ब्रह्मणा मही दारितमेनेन महदन्तरिक्षं दिवं दाधार पृथिवीग्ं सदेवां यदहं वेद तदहं धारयाणि मामद्वेदोऽथि विस्रसत् ।

मेधामनीषे माविशताग्ं समीची भूतस्य भव्यस्यावरुध्यै सर्वमायुरयाणि सर्वमायुरयाणि ।

आभिर्-गीर्भि र्यदतोन ऊनमाप्यायय हरिवो वर्धमानः । यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अधं ते स्याम । ब्रह्म प्रावादिष्म तन्नो मा हासीत् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ सं त्वा सिञ्चामि यजुषा प्रजामायुर्धनं च ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्तिर्-मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे ।

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ स॒ह नाव॑वतु । स॒ह नौ॑ भुनक्तु । स॒ह वी॒र्यं॑ करवावहै ।
ते॒ज॒स्विना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै॑ ॥

ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥

Web Url: http://www.vignanam.org/veda/shanti-mantram-devanagari.html